ज्ञमिहरो मलन्नो मेदकुष्ठहेति शालिहोत्रः। मेकाजादिति इन्। यथा चोक्तम्।
"मधुकैटभयोरासीन्मेदसैव परिप्लुता।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः॥"
मेद्यतीति वा मेदिनी इन्भिद्या स्निह्यति वृत्यादित्वात्। इति तट्टीकायां भरतः॥ (एतन्नामनिरुक्तिर्यथा, देवीभागवते। १। ६। ८३-८४।
"गतप्राणौ तदा जातौ दानवौ मधुकैटभौ।
सागरः सकलो व्याप्तस्तदा वै मेदसा तयोः॥
मेदिनीति ततो जातं नाम पृथ्व्याः समन्ततः।
अभक्ष्या मृत्तिका तेन कारणेन मुनीश्वराः॥"
अपि च। तत्रैव। ३। १३। ८।
"मधुकैटभयोर्मेदःसंयोगान्मेदिनी स्मृता।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")
तस्या उत्पत्तिर्यथा,—
"श्रूयतां वसुधाजन्म सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिद्वदन्तीति मधुकैटभमेदसा।
बभूव वसुधाजन्म तद्विरुद्धमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध न यत्रोर्व्वी पाथसा संवृतेति च॥
तयोर्ज्जीवनकालेन प्रत्यक्षा सा भवेत् स्फुटम्।
ततो बभूव मेदश्च मरणस्यान्तरं तयोः।
मेदिनीति च विख्यातेत्युक्ता येस्त्वन्मतं शृणु॥
जलधौता कृता पूर्व्वं वर्द्धिता मेदसा यतः।
कथयामि च तज्जन्म सार्थकं सर्व्वसम्मतम्॥
पुरा श्रुतं यत् श्रुत्युक्तं धर्म्मवक्त्राच्च पुष्करे।
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्॥
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्।
स च प्रविष्टः सर्व्वेषां तल्लोम्नां विवरेषु च॥
कालेन महता तस्माद्बभूव वसुधा मुने!।
प्रत्येकं प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता॥
आविर्भूता तिरोभूता सा जले च पुनः पुनः।
आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे नारायणनारदसंवादे पृथिव्युपाख्याने ७ अध्यायः॥

मेदिनीद्रवः, त्रि, (मेदिन्याः द्रवः।) धूलिः। इति त्रिकाण्डशेषः॥

मेदुरः, त्रि, (मेद्यति स्निह्यतीति। मिद्+"भञ्जभासमिदो घुरच्।"३।२।१६१। इति घुरच्।) अतिशयस्निग्धः। तत्पर्य्यायः। सान्द्रस्निग्धः २। इत्यमरः। ३।१।३०॥ (यथा, गीतगोविन्दे।१।१।
"मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे! गृहं प्रापय॥")

मेदुरा, स्त्री, (मेदुर+टाप्।) काकोली। इति राजनिर्घण्टः॥ (गुणादयोऽस्याः काकोलीशब्दे ज्ञेयाः॥)

मेदोजं, क्ली, (मेदसो जायते इति। जन्+डः।) अस्थि। इति राजनिर्घण्टः॥

मेदोद्भवा, स्त्री, (मेदाद्भवोऽस्याः।) मेदा। इति राजनिर्घण्टः॥

मेदोन्ध्रः पुं, (मेदोबहुलः अन्ध्रः।) वर्णसङ्करजातिभेदः। इति जटाधरः॥ (यथा, मनुः।१०।४८।
"मेदोन्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम्॥"
क्वचित् मेदान्ध्र इत्यपि पाठः॥)

मेदोवती, स्त्री, (मेदोऽस्याः अस्तीति। मेदस्+मतुप्। मस्य वः।) मेदा। इति राजनिर्घण्टः॥ (मेदोविशिष्टे, त्रि॥)

मेध, ऋ ञ वधमेधासङ्गेषु। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-वधे सक०-अन्यत्र अक०-सेट्।) ऋ, अमिमेधत्। ञ, मेधति मेधते। इति दुर्गादासः॥

मेधः, पुं, (मेध्यते वध्यते पश्वादिरत्रेति। मेध+घञ्।) यज्ञः। इति जटाधरः॥ (यथा, महाभारते। १। १२३। ३६।
"ग्रामणीश्च महीपालानेष जित्वा महाबलः।
भ्रातृभिः सहितो वीरस्त्रीन् मेधानाहरिष्यति॥"
हविः। इति ऋग्वेदे। १०। १००। ६। मन्त्रभाष्ये सायणः॥)

मेधा, स्त्री, (मेधते सङ्गच्छते अस्यामिति। मेध्+"षिद्भिदादिभ्योऽङ्।" ३। ३। १०४। इत्यङ्। टाप्।) धारणावती बुद्धिः। इत्यमरः। १।५।२॥ धारणाशक्तियुक्ता धीर्मेधा मेधते सङ्गच्छतेऽस्यां सर्व्वं बहुश्रुतं विषयीकरोति इति वा मेधा मेधृ ञ सङ्गे मेधायां सेमत्तात् सरोरित्यः आपबहुश्रुतविषयीकरणं धारणा यदुक्तं धारणा बुद्धेर्गुणविशेषः इति॥ इति भरतः॥ *॥ (यथा, मुण्डकोपनिषदि। ३। २। ३।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥")
मेधाकरं औषधं यथा,—
"शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्च्चला।
अभया च गुडूची च अटरूषकवाकुची॥
एतैरक्षसमैर्भागैर्घृतं प्रस्थं विपाचयेत्॥
कण्टकार्य्या रसं प्रस्थं दत्त्वा च समन्वितम्।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम्॥"
इति गारुडे १६८ अध्यायः॥ *॥
मेधाकरगणो यथा। सतताध्ययनम्। तत्त्वज्ञानकथा। श्रेष्ठतन्त्रशास्त्रावलोकनम्। सद्विद्याचार्य्यसेवा च। इति पुराणम्॥ (दक्षप्रजापतिकन्याविशेषः। यथा,—
"कीर्त्तिर्लक्ष्मी धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥"
इति वह्निपुराणे गणभेदनामाध्याये॥
धनम्। इति निघण्टुः। २। १०॥ "मिधृ मेधृ सङ्गमे च। चकारात् हिंसामेधयोश्च। मिधिः सङ्गत्यर्थः। इति माधवः। घञ्। सङ्गच्छतेऽनेन सर्व्वं तद्वता हिंस्यते वा तद्वान् चौरादिभिः घ्नन्ति चैवार्थकारणात् इति महाभारतम्॥ यद्वा, मतौ धीयते अर्जयितव्यं रक्षितव्यं दातव्यमिति धनवता बुद्धौ धनं धार्य्यते। तत्र मतिशब्द उपपदे धातोः घञर्थे कविधानम् इति कः। पृषोदरादित्वात् मतिशब्दस्य मेभावः।" इति तद्भाष्ये देवराजयज्वा॥)

मेधाः, [स्] पुं, (मेधते इति। मेध्+असुन्।) स्वायम्भुवमनुपुत्त्रः। यथा,—
"अग्निध्रश्चाग्निबाहुश्च सहः सवन एव च।
ज्योतिष्मान् द्युतिमान् हव्यो मेधा मेधातिथिर्व्वसुः।
स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धनाः॥"
इति मात्स्ये ६ अध्यायः॥

मेधाकृत्, स्त्री, (मेधां करोतीति। कृ+क्विप्।) श्वेतावरशाकम्। इति राजनिर्घण्टः॥ मेधाकारके, त्रि॥

मेधाजित्, पुं, (मेधां जितवानिति। जि+क्विप्।) कात्यायनमुनिः। इति त्रिकाण्डशेषः॥

मेधातिथिः, पुं, (मेधाया धारणावद्बुद्धेरतिथिरिव।) मनुसंहिताटीकाकृत्। मुनिविशेषः। यथा, श्रीभागवते। १। १९। १०।
"मेधातिथिर्देवल आर्ष्टिषेणो
भरद्वाजो गौतमः पिप्पलादः॥"
(प्रियव्रतपुत्त्रः स च शाकद्वीपाधिपतिः। यथा, श्रीमद्भागवते। ५। २०। २४—२५।
"यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशकः। यस्य ह महासुरभिगन्धस्तद्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः॥" *॥ सप्तदश द्वापरयुगस्य व्यासः। यथा, देवीभागवते। १। ३। ३०।
"मेधातिथिः सप्तदशे व्रती ह्यष्टादशे तथा॥"
प्रजापतेः कर्द्दमस्य पुत्त्रः। यथा, मार्कण्डेये। ५३। २५।
"अग्निध्रो मेधातिथिश्च वपुष्मांश्च तथापरः॥"
दक्षसावर्णिमन्वन्तरे सप्तर्षीणामेकतमः। यथा, मार्कण्डेये। ९४। ८।
"मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽन्यः सबलस्तथान्यो हव्यवाहनः॥"
नदीविशेषे, स्त्री। यथा, महाभारते। ३। २२१। २६।
"धर्म्मस्वती मही चैव मेध्या मेधातिथिस्तथा।
ताम्रावती वेत्रवती नद्यस्त्रिंशोऽथ कौशिकी॥")

मेधारुद्रः, पुं, (मेधया रुद्र इव।) कालिदासः। इति त्रिकाण्डशेषः॥

मेधावती, स्त्री, (मेधा दैयत्वेन अस्ति अस्याः इति। मेधा+मतुप्। मस्य वः। ङीप्। मेधावर्द्धकत्वादस्यास्तथात्वम्।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ मेधाविशिष्टा च॥

मेधाविनी, स्त्री, (मेधास्याः अस्तीति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति विनिः। ततो ङीप्।) ब्रह्मणः पत्नी। इति मेदिनी। ने, २०४॥

मेधावी, [न्] पुं, (मेधास्यास्तीति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति